सञ्चयनं कुर्य्यात्तेषाञ्च गङ्गाम्भसि प्रक्षेप” इति। अतोऽन्यतमदिने खण्डह्नोक्तविधिना त्वस्थिसञ्चयनङ्कार्य्यम्” मिता०। अङ्गिरसा चात्र विशेषो दर्शितः। “अस्थिसञ्चयने यागो देवानाम्परिकीर्त्तितः। प्रेतीभूतन्तमुद्दिश्य यः शुचिर्न्न करोति चेत्। देवतानान्तु यजनन्तं शपन्त्यथ देवताः”। देवताश्चात्र श्मशानवासिन्यः भूतपूर्व्वादगुधाः। श्मशानवासिनो देवाः शवानाम्परिकीर्त्तिता” इति तेनैवोक्तम्। अतस्तान्देवान् अचिरस्मृतञ्च प्रेतमुद्दिश्य धूपदीपादिभिः पिण्डरूपेण चान्नेन तत्र पूजा कार्य्येत्युक्तम्भवति” मिता० प्रा० अध्या०।

**अस्थिसम्भव** पु० सम्भवत्यस्मात् सम्भवः अपादाने अप् ब०। अस्थिजाते १मज्जधातौ यथा च अस्थिजत्वं मज्जस्तथोक्तमस्कृरशब्दे ५५८पृ०। २वज्रे च तस्य दाधीचास्थिजत्वात् तथात्वम् “तमुवाचेन्द्रमाक्रन्दे गरुड़ः पततां वरः। प्रहसन् श्लक्ष्णया वाचा तथा वज्रसमाहृतः। ऋषेर्मानं करिष्यामि वज्रं यस्यास्थिसम्भवम्” भा० आ० ३३अ०। यथा चास्य तदस्थिजातत्वं तथोक्तमशनिशब्दे ३७४ पृष्ठे ३अस्थिजातमात्रे त्रि०।

**अस्थिसार** पु० अस्थ्नः सारः पाकपरिणामः। अस्थिजाते मज्जधातौ। अस्थ्येव सारो यस्य। रक्तमांसशून्यदेहे त्रि०

**अस्थिस्नेह** पु० ६त०। मज्जनि तस्यास्थिसारभूतत्वात्तथात्वम्।

**अस्थूरि** पु० स्था—बा० कूरि। एकाश्वयुक्तशकटे स्थूरि न०त० तद्विपरीतम्। बहुभिरश्वादिभिर्युते शकटे। “अस्थूरि गार्हपत्यानि सन्तु” ऋ० ६, १५, १९।

**अस्थैर्य्य** न० अभावे न०त०। १स्थैर्य्याभावे विरोधे न०त०। २चाञ्चल्ये। न०ब०। ३स्थैर्य्यहीने त्रि०।

**अस्नाविर** त्रि० न०त०। शिरावर्ज्जिते, स्थूलशरीरशून्ये च।

**अस्निग्धदारु** न० अस्निग्धं रूक्षं दारु कर्म्म०। देवदारुभेदे।

**अस्नेह** पु० अभावे न०त०। १स्नेहाभावे न०ब०। २स्नेहशून्ये त्रि०। स्नेहस्तैलादेर्गुणभेदः प्रेम च। [शून्ये त्रि०।

**अस्पन्दन** न० अभावे न०त०। १चलनाभावे न०ब०। २क्रिया-

**अस्पर्श** पु० अभावे न०त०। १स्पर्शाभावे न०ब०। २स्पर्शशून्ये त्रि० “अशब्दमस्पर्शमरूपमव्ययम्” श्रुतिः।

**अस्पर्शयोग** पु० “नास्ति स्पर्शः विषयसंबन्धो यत्र कर्म्म०। विषयप्रतिभासशून्ये निर्विकल्पके ज्ञाने “अस्पर्शयोगो वै नाम सर्व्वसत्त्वसुखो हितः। अविवादो विरुद्धश्च देशितस्तं नमाम्यहम्”।

**अस्पष्ट** त्रि० न०त०। अव्यक्ते। “अथेदानीमस्पष्टब्रह्मलिङ्गानि वेदान्तवाक्यानि विचार्य्यन्ते” शा०भा०।

**अस्पृश्य** त्रि० न स्पृष्टमर्हः अर्हार्थे क्यप् न०त०। स्पर्शायोग्ये मलमूत्रादौ “मलमूत्रपुरीषास्थि निर्गतं ह्यशुचि स्मृतम्” नारं स्पृष्ट्वा तु सस्नेहं सचेलं जलमाविशेत् मनुः। अस्पृश्यस्पर्शने चैव सद्यः स्नानं समाचरेत्” स्मृतिः। अस्पृश्यद्रव्याणि च प्रायेण अशौचाशुद्धिशब्दयोः उक्तानि।

**अस्पृहा** स्त्री अभावे न०त०। “स्पृहाभावे”। “नास्पृहेत्तु परस्वेषु साऽस्पृहा परिकीर्त्तिता”। न०ब०। २स्पृहाशून्ये त्रि०।

**अस्फुट** त्रि० न स्फुटः। व्यक्तभिन्ने। अनलङ्कृतौ पुनः क्वापीति का०प्र० व्याख्यायां “अनलङ्कृती अस्फुटालङ्कारौ”। “क्वचित्प्रकाशां क्वचिदस्फुटार्थसम्” नैष०।

**अस्फुटवाक्** त्रि० अस्फुटा अव्यक्ता वाक् यस्य। कहुदे।

**अस्मद्** त्रि० अस—मदिक्। अहंप्रत्ययावलम्बनत्वेन वेद्ये १प्रत्यगात्मनि, २देहाभिमानिनि जीवे च। “अहं देवो न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक्” “अहमात्मा गुड़ाकेश”। गीता “आवां जहि न यत्रोर्वी सलिलेन परिप्लुता” देवी माहा० “सर्वे वयमतः परम्” “मान्तु वेद न कश्चन” गीता “यः सर्वदाशानपुषत् स्वपोषम्” भट्टिः। “मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्” गीता। अस्य लिङ्गत्रयेऽपि एकविधं रूपम्। आत्मवाचित्वे एवास्य सर्व्वनामता शब्दपरत्वे न गणकार्य्यम् “अस्मदोर्द्वयोश्च” पा०। द्विबहुवचनपरत्वे अस्मद्—अण्। आस्माकः। खञ् आस्माकीन छ अस्मदीयः। एकवचनपरत्वे अण् मामकम् खञ् मामकीनम् छ मदीयम्”। तसिल् अस्मत्तः एकवचने मत्तः “मत्तः परतरं नास्ति” गीता।

**अस्मत्रा** अव्य० अस्मद्+बा० त्राच्। अस्मास्वित्यर्थे। “अस्मत्रा ते सध्र्यक् सन्तु” ऋ० १, १३२।

**अस्मदीय** त्रि० अस्माकमिदम् छ। अस्मत्सम्बन्धिनि “सहास्मदीयैरपि योधमुख्यैः” गीता।

**अस्मद्र्यनच्** त्रि० अस्मानञ्चति अस्मद्+अनच—क्विन् अद्र्यादेशः। अस्मदभिमुखे। “तुभ्यमस्मद्र्यञ्चोददतो मघानि” ऋ० ७, १९, १० शसादावचि अस्मद्रीच इत्यादि। स्त्रियाम् ङीप् अस्मद्रीची।

**अस्मद्विध** त्रि० अस्माकमिव विधास्य। अस्मादृशे एकवचनपरत्वे मद्विधः “न मद्विधे न्यस्यति भारमग्र्यम्” भट्टिः।

**अस्मयु** त्रि० आत्मन अस्मान् इच्छति क्यच् उ बा० व्यत्ययेन एत्त्वम्। हविःस्वीकारार्थम् आत्मनः अस्मान् इच्छति। “उत त्वमस्मयुर्व्वसो!” ऋ० १, ४१, ७।

**अस्माक** त्रि० अस्माकमिदम् अण् अस्माकादेशः नि० वेदे अष्टङिः।